This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग्रसातन्ब्रूहि केशव ॥ १ ॥ श्रीभगवानुवाच ॥ साधु पार्थ महाबाहो बुद्धिमान
सि पांडव । यन्मां पृच्छसि तत्त्वार्थमशेषं प्रवदाम्यहं ॥ २ ॥ आत्म
मंत्रस्य हंसस्य हि परस्परसमं च यात् । योगेनागतकाम्यानां भाव
ना ब्रह्म चक्षते ॥ ३ ॥ शरीरीणामजस्यांतं हंसत्वं पारदर्शिनी । हंसो हंसा
क्षरेणैव कूटस्थं यत्तदक्षरं ॥ ४ ॥ तद्विद्वानक्षरं प्राप्य जह्यान्मरणजन्म
नी । कालकीमुखककारांतं हकारश्चैतनाकृतिः । सकारस्य चतुर्थस्य
कोधः स प्रतिपद्यते ॥ ५ ॥ गच्छंति ष्टं सदा कालं वायुः स्वीकरणां परं ॥ ६ ॥

Checked 2012

Acc No :- ~~1202~~ M1081
Title :- उत्तरगीता
Author :- व्यास
Subject :- वेदांत
पत्रे :- 18

K K S U LIBRARY
RAMTEK
441 106
M1081
Dist. Nagpur

1

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सार्वकालप्रयोगेन सहस्राप्युर्भवेन्नरः ॥ यावत्पश्येत्खगाकारं तदाकां
रं विचिंतयेत् ॥ ११ ॥ खमध्ये कुरु चात्मानं आत्ममध्ये च खं कुरु ॥ आत्मा
नं खमयं कृत्वा न किंचिदपि चिंतयेत् ॥ १२ ॥ स्थिरबुद्धिरसंमूढो ब्रह्म
विद्ब्रह्मणि स्थितः ॥ बहिर्व्योमस्थितं नित्यं नासाग्रे च व्यवस्थितं ॥ १३ ॥ सु
हृदयविनिर्मुक्तो वायुर्यत्र विलीयते ॥ निष्कलंकं विजानीयात् ॥ मुनि
रहितं शिवं ॥ १४ ॥ इदं खमुपना[illegible] मानंदं परमव्ययं ॥ बहिर्व्यो
२ मस्थितं नित्यं नासाग्रे च व्यवस्थितं ॥ १५ ॥ निष्कलंकं विजानीयात् २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्ञात्वा न वेदेन सभो भवेत्॥२६॥ ज्ञानामृतेन तृप्तस्याः कृतकृत्यस्य यो
गिनां नैवास्ति किंचित्कर्तव्यमस्ति चेत्स तत्त्ववित्॥२७॥ तैलधाराम
वच्छिन्नं दीर्घघंटानिनादवत्॥ अवाच्यं प्रणवस्याग्रं यस्तं वेद स
वेदवित्॥२८॥ आत्मानमरणीं कृत्वा प्रणवं चोत्तरारणिं। ध्याननि
र्मथनाभ्यासाद्देवं पश्येन्निगूढवत्॥२९॥ विधूमाग्निनिभं देवं प
श्येद्दृत्यं तनिर्मलं। ताहृशं परमं रूपं स्मरेत्पार्थ ह्यनन्यभाक्॥३०॥
दूरस्थोपि न दूरस्थो दूरस्थोपिंडवर्जितः॥ अमलः सर्वदा देहिस्व

2

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व्यापिनि संजन॥३१॥ कायस्थोऽपि न कायस्थो कायस्थोऽपि न बाध्यते।
कायस्थो नैव युज्येत कायस्थोऽपि न लिप्यते॥३२॥ तिलमध्ये यथा तै
लं क्षीरमध्ये यथा घृतं पुष्पमध्ये यथा गंधं फलमध्ये यथा रस॥३३॥
काष्ठाग्निवत्प्रकाशेत आकाशे वायुवच्चरन्। तथा सर्वगतो देहि दे
हमध्ये व्यवस्थितो॥३४॥ मनस्थो देहिनां देवो मनोमध्ये व्यवस्थितो।
कायस्थोऽपि न युज्येत कायस्थोऽपि न लिप्यते॥३५॥ मनस्थो योगिना
४ देवो मनोमध्ये व्यवस्थितो। मनस्थं मनमध्यस्थं मध्यस्थं मनवर्जि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना।।३६।। मनसा मन मालोक्य स्वयं सिध्यंति योगिना।। दैवतं मनम
ध्यस्थं मनो वर्जितमात्मना।।३७।। मनसैव मनो दृष्ट्वा स्वयं सिध्यंति
योगिना। आकाशं मनसं कृत्वा मनस्कृत्वा निरास्पदं।।३८।। निष्क
लंकं विज्ञानीयात्समाधिस्तस्य लक्षणं। योगामृतरसं पीत्वा वायु
भक्षं सदा सुखी।।३९।। यमं मभ्यस्य येन्नित्यं समाधिं मृत्युनाशक
नो ऊर्ध्वं शून्यं मधः शून्यं मध्ये शून्यं समात्मकं।।४०।। सर्वशून्य समा
त्मानं समक्षोनामसंशयः।। त्रिशून्यं यो विजानीयात्स तु मुच्येत वं

(8)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धनोर॥४१॥सर्वशून्यसमात्मानं समाधिस्तस्य लक्षणं। शून्याभावि
तात्मानमुपपर्यैः प्रमुच्यते॥४२॥अर्जुन उवाच॥ अहृदये भावना
तासिद्धरूपमेता [illegible]नस्याति॥ समापरस्य ब्रह्म कथं ध्यायंति योगिनः
४३॥श्रीभग॰ ऊर्ध्वपूर्णमधः पूर्णं मध्यपूर्णं समात्मकं। सर्वपूर्णं स
मात्मानं समाधिस्तस्य लक्षणं॥४४॥अर्जुन॰ सालंबस्याप्यनित्य
त्वं निरालंबस्य शून्यता। उभयोरपि दोषत्वं कथं ध्यायंति योगिनः॥४५॥
५॥ श्रीभग॰ हृदयं निर्मलं कृत्वा मनरहित्वा निरास्पदं। अहमेकमिदं ५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्वमीति पश्येत्परं सुखं ॥४६॥ अर्जुन० अक्षराणि च मात्राणि सर्वेवि
ड समाश्रितः ॥ बिंदुर्भिद्यति नादेन स नादः केन भिद्यते । श्री भग वा० अन
ह तस्य शब्दस्य तस्य शब्दस्य च ध्वनिः । ध्वनिरंतर्गतं ज्योतिर्ज्यो तिरंत
र्गतं मनः ॥ तन्मनो विलयं याति तद्विष्णोः परमं पदं । ओंकारे ध्वनिना
देन वायोः संहरणांतिकं ॥४९॥ निरालंबं समुद्दिश्य यत्र नादो लयं
गतः ॥ अर्जुन० भिन्ने पंचात्मके देहे गते पंचसु पंचधाः । प्राणो विमुक्त
देहस्तु धर्मा धर्मा ... च धाः ॥५०॥ श्री भग० धर्माधर्मो मनश्चैव पंच

(५)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भूतानि पानि चारेंद्रियाणि च पंचैव पश्चान्याप मंच देवता ॥ ८१ ॥ अन्यो

न्यं मनस्पार्थी नित्यमेवाभिमानिनः ॥ जीवेन सह गछंति यावन्नलं

न विंदति । अर्जुन उवाच ॥ स्थावरं जंगमं चैव यत्किंचित्संचराचरं ॥ जी

वाजीवैर्न जीवंति सा जिवस्तेन जीवति ॥ ८३ ॥ श्री भग० मुखनासिक

यो र्मध्ये प्राणे: संचरते सदा । आकाशः पिबते प्राणं स जीवस्तेन जी

वति । अर्जुन० ब्रह्मांडव्यापितं व्योम व्योम्ना संवेष्टितं जगत । अंत

९ बहिःस्थितं व्योम कथं ध्यायंति योगिनां । श्री भगव० आकाशं अन ९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वकारोस्याद्यकारोव्यादिनस्तथा। आकारास्यगुणः शब्देन ॥

वं ब्रह्ममुच्यते। अर्जुन उवाच। शब्दं लोहतालुजिह्वानामास्यदंपनहृदय

तः अक्षरत्वं कुतस्तेषां क्षरत्वं वर्ततिसदा। ५७ ॥ श्रीभगवा० अघोष

मव्यंजनमस्वरं च नातालुकं गोष्टनासिकं च। अरेफजातं परमुष्मवर्जितं

तदक्षरं नः क्षरते कदाचित। ५८ ॥ अर्जुन० ज्ञात्वासर्वगतंब्रह्म सर्वभू

ताधिवासिनां। इंद्रियाणांनिरोधेन केन स्यांतिधातवः। ५९ ॥ देहस्थे

कुतो ... नो कुतो हता। श्रीभग० नानदेवानिरोधस्यात्वया।

(5)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तनत्वं न विंदंति॥ विधिहेतुपरे तत्वे एक एवानुविंदति॥ ६०॥ नवछिद्रक
ते देहे स्रवंति घटिकाध्रुवा। एवंबाधेन शौचेन पुमान्ब्रह्म नाविंदति
॥६१॥ अत्यंतमलिनो देहो देही चात्यंतनिर्मलः। उभयोरंतरं ज्ञात्वा
कस्य शौचं विधीयते॥ ६२॥ हरिः ॐ तत्सदिति श्रीमहाभारते शतसा
हस्र्यां संहितायां वैयासिक्यां भीष्मपर्वणि श्रीमद्भगवद्गीतासूपनि
षत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे श्रीकृष्णकृतौ स
मार्कज्ञानयोगो नाम प्रथमोऽध्यायः॥ अर्जुन उवाच॥ ज्ञात्वा स्वर्ग राम

७ ॥७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तं ब्रह्मसर्वरूपं परमेश्वरं अहं ब्रह्मेति निर्दिष्टं प्रमाणं तत्र किं भवेत् ॥ १ ॥ श्रीभ
गवानुवाच । यथा जले जलं क्षिप्तं क्षीरे क्षीरं घृते घृतं । अविशेषो भवेत् त
द्वज्जीवात्मा परमात्मनो ॥ २ ॥ अर्जुन ॰ ज्ञानाद्देवो भवेज्ज्ञेयं विदित्वा तत्क्षणे
न तु । ज्ञानमात्रेण मुच्येन किं पुनर्योगधारणात् ॥ ३ ॥ जीवे परे च तादा
त्म्यं सर्वगं ज्योतिरीश्वरं । प्रमाणलक्षणं ज्ञेयं स्वयमेकाय वेदिना ॥ ४ ॥
ज्ञानात्संभवतो ज्ञेयं विदित्वा तत्क्षणे न तु । ज्ञानमात्रेण मुच्येत किंतु
नर्योगधा ॥ ५ ॥ ज्ञानेन दीपितो देहे बुद्धिर्ब्रह्मसमन्वितः ॥ ब्रह्मज्ञानाग्नि

6

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नां नित्यं निर्दहेन् कर्मबंधनं ॥ ६ ॥ अनः पवित्रं परमेश्वराख्यं मद्वैतरू
पं परमात्मनोभावयोद्भवेत्तये मनुप्रविष्टं तदात्मरूपोनिरुपाधिसं
स्थः ॥ ७ ॥ आकाशवत्सूक्ष्मशरीरमात्मानदृश्यते वायुवदंतरात्मा
८ सबाह्यमभ्यंतरनिश्चलात्मा ह्यानोल्कया पश्यतिचांतरात्मा ॥ ८ ॥ य
त्रयत्रमृतोह्यानिरेनकेनापिमृत्युना ॥ यथासर्वगतंव्योमतत्रतत्र
लयंगताः ॥ ९ ॥ शरीरंव्यापितंव्योमभुवनानिचतुर्दश ॥ निश्चलोनि ८
र्मलोदेहिसर्वव्यापिनिरंजनं ॥ १० ॥ उक्तमपियोगच्छेत्सायम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नसा सकृत्। सर्वं तरति पाप्मानं तस्य जन्मशतार्जितं॥ ११॥ दक्षलोदि
गत्वा नाडी वह्निमंडलगोचरा। देवयान मिति ज्ञेया पुण्यकर्मदि
सारिणी॥ १२॥ इडा तु वाम निश्वासो सोममंडलगोचरा। पितृ
यानमिति ज्ञेया सर्वेषां प्राणिनां हृदि॥ १३॥ गुदस्य पृष्ठभागेस्मिन्
वीणादंडस्य देहभृत्। दीर्घास्तिमूर्ध्नपर्यंतं ब्रह्मदंडेति कथ्यते।
॥ १४ तस्यांते सुषिरं सूक्ष्मं ब्रह्मनाडि स्तु सूरिभिः इडापिंगलयो
र्मध्ये सुषुम्ना सूर्यमंडले॥ १५॥ सर्वं प्रतिष्ठितं तस्मिं सर्वगं सर्वतो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मुरवांतस्य मध्येगतासूर्यसोमाग्निपरमेश्वर॥१६॥भूतालोका
द्रिशेलना समुद्राः पर्वताखिलाः॥द्वीपाश्चानिम्नगावेदाशास्त्रवि
द्याकलाक्षरा॥१७॥स्वरामंत्रापुराणादिगुणा एतेश्च सर्वशा।
बीजंजीवात्मनातेषांक्षेत्रज्ञःप्राणवायवा॥१८॥सुषुम्नांतर्गतं
विश्वंतस्मिन्सर्वंप्रतिष्ठितं॥नानानाडिप्रसवगंसर्वभूतांतरात्म
नि॥१९॥ऊर्ध्वमूलमधःशाखवंवायुमार्गेणसर्वगं॥द्वोसप्ततिस
हस्राणिनाड्यासर्वत्र गोचराः॥२०॥कर्ममार्गेणसुछिरास्तीर्यं

९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वायुशिरात्मिका। अथ: श्वोर्ध्वं गतस्तत्तु सर्वधारात्मिसोध्यय॥२२॥
वायुना सह जीवोर्ध्वगामिमोक्षमवाप्नुयात्। अमरावती स्थले श्मिन
मुख्याय्यै पर्वती दिशि॥२२॥ आग्नेलोकमथाग्नेया चक्षुस्तेजोवती द्यु
ति। याम्यसंयमनी श्रोत्रे यमलोके प्रतिष्ठिता॥२३॥ नैरृत्यां व भ
नाश्चै नैरृतिर्नैरृत्याश्रिता:। विभावरि प्रतिच्यां तु दृष्टिश्छेव वरुणिका
री॥२४॥ वायु गंधवती देशे वायुलोके प्रतिष्ठिता। सौम्ये पुष्पवती
नाम सोमलोके प्रतिष्ठिता॥२५॥ वामकर्णे पुविज्ञेयो वायुमादि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

10

त्यतिष्ठति। वामवत्तुधिवेशानेशिवलोकेमनोन्मनि ॥२६॥ मूर्धन्ब्र
ह्मपुरीहैया ब्रह्मांडदेहमाश्रितां पादादस्तुशिवलोकंतुकाला
ग्निप्रलयांतकाः॥२७॥ अनामयमधश्चोर्ध्वंमध्यमंतबहि
स्थितां अधः पादंतलंविद्यात्पादोर्ध्वमतलंविदुः॥२८॥ वितलं
पादादूर्ध्वंस्तुतलंजंघउच्यते। महातलंतुजानोस्यात्थिके दे
शे रसातलं॥२९॥ कटिस्तलातलंप्रोक्तंसर्वपातालसंज्ञया॥
कालाग्निनरकंघोरंमहापातालसंज्ञकं॥३०॥ पाताले नं 10

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ध्यधोभागे मेोगेंद्र फणिमंडले वेष्टितः सर्वतोनंतास विश्वजीवसं
ज्ञिका ॥ ३१ ॥ भूर्लोकं नाभिदेशेस्तु भुवर्लोकं तु कुक्षितः ॥ हृदयं स्वर्गलो
कंतु सोमसूर्यसनक्षत्रकं ॥ ३२ ॥ हृदयं कल्पितो देहि तस्मिन्सर्वमहात्म
नः ॥ विश्वश्चाश्रितो महर्लोके जनलोकं तु कंठके ॥ ३३ ॥ तपोलोकं भ्रुवोर्म
ध्ये मूर्ध्नि स संप्रतिष्ठितं ॥ एवं ब्रह्मांडनिलया आस्मिन्देहे प्रतिष्ठिता ॥ ३४ ॥
ब्रह्मांडेनाटतोलोको अंडमाद्भिश्च वेष्टितं ॥ अग्निनाग्नोसितं तोयं वा
युनाग्नियुक्तं सदापि ॥ ३५ ॥ आकाशेनाविबद्वायुर्मनः साकाशमे

(७)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वत्त्वबुद्धिरहं भ्रमात्। चित्तं हित्वाहं परमात्मनि ॥३६॥ तुर्यं तुर्यमतीतं
वा शिवस्थाने मनोमयं। असत्समस्तमात्मेति धेयेत्सत्यं परमात्मनि
॥३७॥ अहं ब्रह्मेति मां ध्यायेत् कायमनसा सकृत्। सर्वं तरति पा
प्मानं कल्पकोटिशतैः कृतं ॥३८॥ घटं संवृत्यमाकाशं नियमाने घ
टे यथा। घटो नियत माकाशं तद्वज्जीवात्मा आत्मनि ॥३९॥ घटाका
शमिवात्मानं विलयं वेत्ति तत्त्वतः। स गच्छति निरालंबं ज्ञानलोकप्र
२१ नसंशयः ॥४०॥ तपेद्वर्षसहस्रं साग्रं एकपादस्थितो नरः। एकस्य २१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ध्यानयोगेन कलां नार्हंति षोडशीं ॥ ४१ ॥ अश्वमेधसहस्त्राणि वाज
पेय शतानि च । एकस्य ध्यानयोगेन कलां नार्हं ॥ ४२ ॥ ब्रह्महत्या
सहस्त्राणि वीरहत्याशतानि च । एकस्य ध्यानयोगेन दहत्यग्निरि
धंधने ॥ ४३ ॥ अनंतकर्म शौचं च जपयज्ञस्तथैव च । वेदाध्यायनती
र्थानि यावत्तत्वं न विंदति ॥ ४४ ॥ विविदेहउपरे तत्वे एक एवानुविंद
ति । तावद्भ्रमति संसारे यावदात्मा न विद्यते । स्वयं ... देहे
हं अस्मीति निश्चया ॥ ४६ ॥ चतुर्वेदा विदो विप्रा सूक्ष्म ब्रह्मा न विंदति ॥

10

वेदभारभराक्रांतास्ते वै ब्राह्मणगार्दभाः ॥ पठित्वा चतुरो वेदा-
न्धर्मशास्त्राण्यनेकशः ॥ नाहं ब्रह्मेति यो विद्याद्दर्वी पाकरसं य-
था ॥ यथा खरश्चंदनभारवाही सारस्य वाही न तु चंदनस्य ॥ एवं हि शा-
स्त्राणि बहून्यधीत्य सारं न जानन् खरवद्वहंति ॥ ४८ ॥ आहारनिद्रा-
भयमैथुनानि सामान्यमेतत्पशुभिर्नराणां ज्ञानं नराणामधिको
विशेषो ज्ञानेन हीनं पशुभिः समानः ॥ ४९ ॥ प्रातर्मूत्रपुरीषाभ्यां म-
ध्याह्ने क्षुत्पिपासया ॥ सायं कामेन बाध्यंते जंतवो निशि निद्रया ॥ ५० ॥ १२ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नादबिंदुसहस्राणिबीजकोटिशतानिच। सर्वेनष्टस्मानिरहितंय
त्रदेवोनिरामयः॥५१॥ द्वेपदेबंधमोक्षाभ्यांममेतिनममेतिच। मम
तिबध्यतेजंतुर्निर्ममेतिप्रमुच्यते॥५२॥ अहंब्रह्मेतिनियतंमोक्ष
हेतुर्महात्मनां। अनेकवर्णानांक्षीरस्याप्येकवर्णता। क्षीरवत्
पश्यतेज्ञानंलिंगिनांतुगवांयथा॥ मनसोह्युन्मनीभावादेतन्नैवो
पलभ्यते॥५४॥ यदायत्युन्मनीभावंतदातत्परमंपदं। अन्यानुम
नोनिराकारांनुपारंहीयते सुधा॥५५॥ अहंब्रह्मेतिजानातितस्यमु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्तिर्नजायते॥इतिश्रीमदुत्तरगीतायांसूपनिषत्सुब्रह्मविद्यायांयो
गशास्त्रेश्रीकृष्णार्जुनसंवादेज्ञानयोगोनामद्वितीयोध्याय ४॥ ॐ॥
अनंतशास्त्रंबहुधाश्रायविद्याअल्पश्चकालोबहवश्चविघ्नता।यत्सारभूतंतदु
पासनीयंहंसोयथाक्षीरमथांबुमिश्रं॥१॥पुराणंभारतंवेदाःशास्त्रा
णिविविधानिच।पुत्रदारादिसंसारोयोगाभ्यासस्यविघ्नकृत्॥२॥इदं
ज्ञानइदंज्ञेयंयत्सर्वंज्ञातुमिच्छति।अपिवर्षसहस्राणिशास्त्रांतंना
१३ धिगच्छति॥३॥विज्ञेयोक्षरतंमात्रंजीवितंचापिचंचलं।विहायशास्त्रजा १३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जातानि यत्सर्वं यउपास्यतां ॥४॥ पृथिव्यां यानि भूतानि जिह्वोपस्थ
निमित्तता ॥ जिह्वोपस्थपरित्यागी पृथिव्यां किं प्रयोजनं ॥५॥ तीर्थानि
तोयपूर्णानि देवान्पाषाणमृण्मयान् । योगिनो न प्रपद्यंते स्वात्मध्या
नपरायणा ॥६॥ अग्निर्देवो द्विजातीनां हृदि इति भाति योगिनां । प्रतिमाः
स्वल्पबुद्धीनां सर्वत्र समदर्शिनि ॥७॥ सर्वत्रावस्थितं शांतं न प्रपश्ये
ज्जनार्दनं ज्ञानचक्षुर्विहीनस्य दंधस्तु यस्त्नि नि बोधितं ॥८॥ यत्र यत्र म
नोयाति तत्र तत्र परं पदं ॥ तत्र तत्र परं ब्रह्म सर्वरूपमिवास्थितं ॥९॥ हरयं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ति न [illegible] गगनवातिनिर्मलं अहमेवाक्षरं ब्रह्म परमं विष्णुमव्य
यं ॥१०॥ यो बालरूपखगाकारं विविधाकारं चिंतयेत् । स्वमध्ये स्थितात्मा
नं आत्मन्मध्ये च खं कुरु ॥११॥ आत्मानं खमयं [illegible] मृर्यं [illegible] न किंचिदपि
चिंतयेत् । सकलं त्वं [illegible] मोक्षद्वारेण निर्गतो ॥१२॥ अपवर्गस्य प
तारं परमं विष्णुमव्ययं । सर्वतेज्योतिराकाशं सर्वभूतगुणान्वितं ॥१३॥
सर्वत्र परमात्मानं ब्रह्मेति परमेश्वरं । अहं ब्रह्मेति यत्तत्त्वं विजानाति न
२४ र सदा ॥१४॥ हत्वापि से मां लोका सर्वाशिस्तवं विक्रयी । सर्वं निषिद्धं २४

त्वापि कर्मभिर्नं न निबध्यते॥१५॥ निमिषं निमिषार्धं वा यत्र तिष्ठंति योगिनां॥
तत्र तत्र कुरुक्षेत्रं प्रयागो नैमिषं वनं॥१६॥ निमिषं निमिषार्धं वा योगि
नां ध्यानमवितं ॥ ...क्रतु कोटिसहस्राणां ध्यानमेकं विशिष्यते॥१७॥ ब्र
... नित्यं दद्यात् पुण्यपातकं॥ मित्रामित्रं सुखं दुःखं मिष्टानि
... एवं मावमानं न तथा निद्रा महाशनं॥ भिक्षान्नं देहरक्षा
... निर्वाहणं॥१९॥ अन्नदानं च हिरण्यं च स्नानं करा... योदनं त
... नंति सत्यं योगीयदृच्छितं समपेक्षते॥२०॥ संभवेन्नस्य केवलं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

13

...पुनर्जन्म न विद्यते॥ भिक्षाहारो निराहारो भिक्षान्नं नैव प्रतिग्रहः॥४
॥२२॥ ... नो वा मृतो वापि सोमपानं दिने दिने॥ सित निद्रा विनीके
धारणी॥ ... वारिणी॥ अचलो केशवे भक्तिर्वैभवः किं प्रयोज
नं॥ यत्र कोप्र न विष्णु के जगरस्तर्पयते खिलं॥२२॥ तस्माद्ब्रह्मविदे
देयं यद्यस्ति वस्तु किंचन॥ कुरुक्षेत्र तिष्ठति यस्यान्नं योगाभ्यासे न जा
येत्॥ स विस्तारयति दाता रं हृ आधूर्व ब्रह्मणा परा रः॥२४॥ यस्ते यत हस्ते
जलं दद्या भिक्षं दद्यात् पुनर्जन्म॥ ते हि दत्ता मेरुना तुल्यं तज्जलं सागरे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नै

षमां यति र्म्मस्य रहेमुंक्तेतन मुंक्ते हरिस्तु यं ॥ हरिर्यस्य रहेमुंक्तेतन मुं
क्तेजगत्त्रयं ॥ २६ ॥ अहिमिव जनयोगं सर्वदा वर्जयेद्यः कुणपमिवसुनारीं
त्यक्तुकामो विरागी ॥ विषमिव विषयांस्त्वामन्यमानो दुरंतां याति परम
हंसो मुक्तिभावमेव ॥ २७ ॥ यथा रविः सर्वरसान्प्रभुंक्ते हुताशनश्चा
पि हि सर्वभक्षः । तथैव योगी विषयान्प्रभुंक्ते न लिप्यते कर्मशुभाशु
भैश्च ॥ २८ ॥ ध्यानेन योगा ॥ रणिमंथनेन पंचालकैकर्मगुणेंधनेन
सत्त्वा ॥ ग्निनाधारसमन्वितेन दग्धं भुवनं तेन सह कर्मबंधैः ॥ २९ ॥

19

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[illegible]लामेन जगद्द्विधा तस्य मुक्तिर्न विद्यते। समानं सर्वभूतानां ब्रह्म
स्त्र[illegible] कल्पितं सूक्ष्म तनु निर्मलं ब्रह्म पद्म पत्र निभाकृति। सुचित्तं
निर्मलं [illegible] तं नि[illegible] नित्य वर्जितं॥ ३२॥ सर्वचिंता विनिर्मुक्तो संनि
यं मन [illegible] अश्वमेध सहस्राणि कुरुते ब्रह्मवित्नरः॥ ३३॥ ब्र
ह्महत्यादि [illegible] पापैः प्रमुच्यते। अभक्ष्यं भक्षयेद्योगी अ
पेयं पिबते सदा। अगम्यागमनं कृत्वा त्रयं योगस्य लक्षणं॥ ३४॥
१५ अभक्ष्यमोंकार इत्याहु अपेयं पिबतं कलां। अगम्यं मोक्ष [illegible]

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

K K S U LIBRARY
RAMTEK
441 106
M1081
Dist. Nagpur

15

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=23.09.20 15:58
,TRANSFERRED=2020/09/23 at 16:01:40
,PAGES=29
,TYPE=STD
,NAME=S0003689
,Book Name=M-1081-UTTARGITA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection